M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. 887

Title: Apāmārjana Stotra

887

887

C

		Apāmārjana stōtra	Title
			Author
			Editor
			Year, Vols.
			Publisher
SK			Remarks

887

॥कृष्णाय॥ ॥अथापामार्जनस्तोत्रंलिख्यते॥ ॥दाल्भ्यउवाच॥भगवन्प्राणिनःसर्वेवि
षरोगाद्युपद्रवैः॥दुष्टग्रहोपघातैश्चसर्वेलोकाह्युपद्रुताः॥१॥अभिचारककृत्यादिस्पर्शरोगैः
श्चदारुणैः॥सदासंपीड्यमानास्तुतिष्ठंतिमुनिसत्तम॥२॥केनकर्मविपाकेनविषरोगाद्युपद्रवा
॥नभवंतिनृणांब्रूहियथावद्वक्तुमर्हसि॥३॥पुलस्त्यउवाच॥ ॥व्रतोपवासैर्यैर्विष्णुर्नान्यज
न्मनितोषितः॥तेनरामुनिशार्दूलग्रहरोगादिभागिनः॥४॥यैर्नतत्प्रवणंचित्तंसर्वदैवनरैः
कृतं॥विषज्वरग्रहाणांतेमनुष्यादाल्भ्यभागिनः॥५॥आरोग्यंपरमामृद्धिंमनसायद्यदिच्छ
ति॥तत्तदाप्नोत्यसंदिग्धंपरत्राप्यच्युततोषणात्॥६॥नाधिंनाप्नोतिनाव्याधिंनविषग्रहबंधनं
॥कृत्यांसर्वभयंवापितोषितेमधुसूदने॥७॥सर्वेदुष्टशमास्तस्यसौम्यास्तस्यसदाग्रहाः॥दे
वानामप्यधिष्ठोसौतुष्टोयस्यजनार्दनः॥८॥यःसमःसर्वभूतेषुयथात्मनितथापरे॥उप १
वासादिनातेनतोष्यतेमधुसूदनः॥९॥तोषितेतत्रजायंतेनराःपूर्णमनोरथाः॥अरोगाः
सुखिनोभोगान्भोक्तारोमुनिसत्तम॥१०॥नतेषांशत्रवोनैवस्पर्शरोगाभिचारकं॥ग्र

हरोगादिकंवापिपापकार्यंनजायते॥११॥अव्याहतानिकृष्णस्यचक्रादीन्यायुधानितत्॥रक्ष
तिसकलापद्भ्योयेनविष्णुरुपासितः॥१२॥दाल्भ्यउवाच॥ ॥अनाराधितगोविंदायेनरादुः
खभागिनः॥तेषांदुःखाभिभूतानांयत्कर्तव्यंदयालुभिः॥१३॥पश्यद्भिःसर्वभूतस्थंवासु
देवंमहामुने॥समदृष्टिभिरीशेशंतन्ममब्रूह्यशेषतः॥१४॥पुलस्त्यउवाच॥ ॥गृहीत्वातु
समूलाग्रान्कुशान्शुद्धांश्चरोगिणः॥मार्जयेत्सर्वगात्राणिकुशाग्रैर्दाल्भ्यशांतिकृत्॥१५
कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः॥कुशाग्रेशंकरंविद्यात्तत्रयोदेवाःकुशेस्थिता
॥१६॥रोगग्रहविषार्तानांकुर्याच्छांतिमिमांबुधः॥विष्णुभक्तोविशेषेणशुचिस्तद्गतमा
नसः॥१७॥ध्यात्वाभूत्वासदाविष्णुनामान्यंगेषुविन्यसेत्॥पूर्वेनारायणःपातुवारिजाक्ष
स्तुदक्षिणे॥१८॥प्रद्युम्नःपश्चिमायांतुवासुदेवस्तथोत्तरे॥ईशान्यांरक्षकोविष्णुराग्नेय्यांतु
जनार्दनः॥१९॥नैरृत्यांपद्मनाभस्तुवायव्यांमधुसूदनः॥ऊर्ध्वेगोवर्द्धनोदेवअधश्चा
पित्रिविक्रमः॥२०॥एताभ्योदशदिग्भ्यश्चसर्वतःपातुकेशवः॥अंगुष्ठाग्रेतुगोविंदंतर्ज

नरः

...च महीधरं ॥२१॥ मध्यमायां हृषीकेशं अनामिकायां त्रिविक्रमं ॥ कनिष्ठकायां न्यसेद्विष्णुं
करमध्ये तु माधवं ॥२२॥ शिखायां केशवं न्यस्येत् मूर्ध्नि नारायणं न्यसेत् ॥ माधवं तु ललाटे
गोविंदं तु भ्रुवोः स्थितं ॥२३॥ चक्षुर्मध्ये न्यसेद्विष्णुं श्रवणे मधुसूदनं ॥ त्रिविक्रमं कपो
लयो वामनं कर्णमूलयोः ॥२४॥ दामोदरं दंतपंक्त्यां वराहं चिबुके तथा ॥ जिह्वायां वा
सुदेवं च त्वग्स्थितं गरुडध्वजं ॥२५॥ हृषीकेशं उत्तरोष्ठे पद्मनाभस्तथोत्तरे ॥ कंठमध्ये
च वैकुंठमनंतं नासिकोपरि ॥२६॥ दक्षिणे तु भुजे विप्र विन्यसेत्पुरुषोत्तमं ॥ वामके तु महायोग
िनं माधवं हृदि विन्यसेत् ॥२७॥ पीतवाससं सर्वतनो हरिनाभ्यां तु विन्यसेत् ॥ करे तु दक्षिणे वि
प्र ततः संकर्षणं न्यसेत् ॥२८॥ वामे रिपुदरं विद्यात् कटिसूत्रे जनार्दनं ॥ पृष्ठे क्षितिधरं वि
द्यादच्युतं स्कंधमूलयोः ॥२९॥ वक्षस्थले माधवं तु ऊरुयोर्योगशायिनं ॥ स्वयंभुवं मेद्रम २
ध्ये ऊर्वोः श्रीगदाधरं ॥३०॥ चक्रायुधं जानुमध्ये जंघयोरच्युतं तथा ॥ गुल्फयो नारसिंहं तु
पादपृष्ठे मितौजसं ॥३१॥ [illegible] धरं न्यस्येत् [illegible] जानुहि संधिषु ॥ रोम [illegible]

[illegible] रक्तादि [illegible] मज्जासु ॥३२॥ नखेषु माधवं चैव न्यसेत्पादतलेऽच्युतं ॥ मनोबुद्धिरहंकारे चैवं न्य
सेत् जनार्दनं ॥३३॥ एवं न्यासविधिं कृत्वा यत्कार्यं शृणु तद्द्विज ॥ वैष्णवेन तु कर्तव्यं सर्वसिद्धि
प्रदायिना ॥३४॥ पूजाकाले तु देवस्य स्नानकाले तथैव च ॥ होमारंभे कर्तव्यं त्रिसंध्यासु च नि
त्यशः ॥३५॥ अन्वयं सर्वभूतेभ्यो विष्णुलोकं स गच्छति ॥ विष्णुलोकं स गच्छति ॐ नमो भगवते
श्रीवासुदेवाय ॥ ॥ॐ नमः परमार्थाय ॥ अस्य पामार्जन मंत्रस्य पुलस्त्य ऋषिः श्रीनृसिंहो देवता द
रामुकस्येति बीजं । अच्युतानंत गोविंदेति शक्तिः ॥ त प्रहाटकके[illegible]तेति कीलकं ॥ समस्तानि
लाभसिद्ध्यर्थे जपे विनियोगः ॥ ॥ॐ नमः पुरुषार्थाय पुरुषाय महात्मने ॥ अरूपबहुरूपा
य व्यापिने परमात्मने ॥३७॥ निष्कल्मषाय शुद्धाय ज्ञानयोगरताय च ॥ नमस्कृत्वा प्रवक्ष्यामि
यत्तत्सिद्ध्यतु मे वच ॥३८॥ वराहनरसिंहाय वामनाय महात्मने ॥ नमस्कृत्वा प्रवक्ष्यामि ॥३९॥
वराहं नारसिंहं तु वामनं विष्णुमेव च ॥ नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतु मे वच ॥४०॥ त्रिवि
क्रमाय रामाय वैकुंठाय नराय च ॥ नमस्कृत्वा प्रवक्ष्यामि यत्तत्सि० ॥४१॥ वराहनारसिंहेश

वामनेशस्त्रिविक्रमः॥ हयग्रीवेशः सर्वेशो हृषीकेशो हराशुभं॥४२॥ अपराजितचक्राद्यैश्चतुर्भिः
परमायुधैः॥ अखंडितानुभावैस्त्वं सर्वदुष्टहरो भव॥४३॥ हरामुकस्य दुरितं दुःकृतं दुरयो
षितं॥ मृत्युबंधार्त्तिभयदं दुरिष्टस्य च यत्फलं॥४४॥ पराभिध्यानसहितैः प्रयुक्तं चाभिचारि
कं॥ परस्पर्शमहारोगप्रयोगं जरया जर॥४५॥ हरये वासुदेवाय नमः कृष्णाय शार्ङ्गि
णे॥ नमः पुष्करनेत्राय केशवायादिचक्रिणे॥४६॥ नमः कमलकिंजल्कपीतनिर्मलवास
से॥ महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे॥४७॥ दंष्ट्रोद्धृतक्षितिधृते त्रयमूर्त्तिमते नम
॥ महायज्ञवराहाय शेषभोगोरुशायिने॥४८॥ तप्तहाटककेशांतज्वलत्पावकलोचन
॥ वज्राधिकनखस्पर्श दिव्यसिंह नमोस्तु ते॥४९॥ कास्यपायादिह्रस्वाय ऋग्यजुःसामभू
त्तये॥ तुभ्यं वामनरूपायक्रमते गां नमो नमः॥५०॥ वराहशेषदुष्टानि सर्वपापफलानि वै
॥ मर्द मर्द महादंष्ट्र मर्द मर्द च यत्फलं॥५१॥ नरसिंह करालास्य दंतप्रांतनलोज्वल॥ भंज २
भंज निनादेन दुष्टान्यस्यार्त्तिनाशन॥५२॥ ऋग्यजुःसामगर्भाभिर्वाग्भिर्वामनरूपधृक्॥

प्रशमं सर्वदुःखानि नयत्वस्य जनार्दनः॥५३॥ ऐकाहिकं द्व्याहिकं वा तथा त्रिदिवसं ज्वरं॥ चातु
र्थिकं तथा ह्यत्युग्रं तथैव सततज्वरं॥५४॥ सदोषं संनिपातोत्थं तथैवागंतुकज्वरं॥ शमं नया
शु गोविंद छिंधि छिंध्यस्य वेदनां॥५५॥ नेत्रदुःखं शिरोदुःखं दुःखं चोदरसंभवं॥ अनुच्छ्वासमा
सतिश्वासं परितापं सवेपथुं॥५६॥ गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयं॥ श्वित्रादिन्न
खजान् रोगान् त्वगस्थांतर्बहिःस्थितान्॥५७॥ कामिकादींस्तथा रोगान्प्रमेहांश्चातिदारु
णान्॥ भगंदरातिसारांश्च मुखरोगं सवाल्गलिं॥५८॥ अश्मरीमूत्रकृच्छ्रांश्च रोगानन्यांश्च
दारुणान्॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः॥५९॥ कफोद्भवाश्च ये रोगा ये चान्ये स
न्निपातकाः॥ आगंतवश्च ये रोगा लूताविस्फोटकादयः॥६०॥ ते सर्वे प्रशमं यांतु वासुदेवा
पमार्जिताः॥ विलयं यांतु ते सर्वे विष्णोरुच्चारणेन तु॥६१॥ क्षयं गच्छंतु चाशेषास्ते चक्राभि
हता हरेः॥ अच्युतानंतगोविंदनामोच्चारणभीषिताः॥६२॥ नश्यंति सकला रोगाः सत्यं सत्यं
मस्त रोगास्ते ... पुनः सत्यमुद्धृत्य भुजमुच्यते॥६३॥ वेदशास्त्रात्परं नास्ति न देवः केश

...पकृत्रिमं चापि यद्विषं ॥६४॥ दंतोद्भवं नखोद्भूतं ...
...न वं चैव विषमत्यंतदुःसहं ॥६५॥ शमं नयतु गोविंदः कीर्त्तितोऽस्य जनार्द्दनः ॥ ग्रहा
न्प्रेतग्रहांश्चैव तथा वैयकिनीग्रहान् ॥६६॥ वैतालांश्च पिशाचांश्च गंधर्वान्यक्षराक्षसान्
॥ शाकिनीपूतनाद्यांश्च तथा वैनायकग्रहान् ॥६७॥ मुखमंडिकां तथा क्रूरां रेवतीं वृद्धरेवतीं
॥ वृद्धिकां स्नानग्रहांश्चैव तथा मातृग्रहानपि ॥६८॥ बालस्य विष्णोश्चरितं हंतु बालग्रहा
निमान् ॥ वृद्धानां ये ग्रहाः केचित् ये च बालग्रहाः क्वचित् ॥६९॥ नरसिंहस्य ते दृष्ट्वा द
ग्धा ये चापि यौवने ॥ सटाकरालवदनो नरसिंहो महारवः ॥७०॥ ग्रहानशेषान्निःशेषान्क
रोतु जगतो हितः ॥ नरसिंह महासिंह ज्वालामालोज्ज्वलानन ॥७१॥ ग्रहानशेषान्सर्वेश
खाद खादाग्निलोचनः ॥ ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः ॥७२॥ यानि च क्रूरभूता
नि ग्रहपीडाश्च दारुणाः ॥ शस्त्रक्षतेषु ये दोषा ज्वालागर्द्दनकादयः ॥७३॥ तानि सर्वाणि ४
सर्वात्मा परमात्मा जनार्द्दनः ॥ किंचिद्रूपं समास्थाय वासुदेवास्तु नाशय ॥७४॥ क्षि

प्त्वा सुदर्शनं चक्रं ज्वालामालातिभीषणं ॥ सर्वदुष्टप्रशमनं कुरु देववराच्युत ॥७५॥ सु
दर्शन महाज्वाल छिंद्धि छिंद्धि च मारय ॥ सर्वदुष्टानि रक्षांसि क्षिपयारिविभीषण ॥
७६॥ प्राच्यां प्रतीच्यां दिशि च दक्षिणोत्तरतस्तथा ॥ रक्षां करोतु सर्वात्मा नरसिं
हः स्वगर्जितैः ॥७७॥ भुव्यंतरिक्षे च तथा पार्श्वतः पृष्ठतोऽग्रतः ॥ रक्षां करोतु भगवा-
न्बहुरूपी जनार्द्दनः ॥७८॥ यथा विष्णु जगत्सर्वं सदेवासुरमानुषं ॥ तेन सत्येन
सकलं दुष्टमस्य प्रशाम्यतु ॥७९॥ यथा विष्णौ स्मृते सद्यः संक्षयं याति पातकं ॥ ते
न सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥८०॥ परमात्मा यथा विष्णुर्वेदांतेषु पिगीय
ते ॥ तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥८१॥ शांतिरस्तु शिवं चास्तु प्रणाश्यत्व
शुभं च यत् ॥ वासुदेवशरीरोत्थैः कुशैः संमार्जितं मया ॥८२॥ अपामार्जतु गोविं
द नरो नारायणस्तथा ॥ तवास्तु सर्वदुःखानां प्रशमो वचनाद्धरेः ॥८३॥ शांतिस
मस्तरोगास्ते ग्रहाः सर्वे विषाणि च ॥ भूतानि प्रशमं यान्ति संस्तुते मधुसूदने ॥८४॥

एतत्समस्तरोगेषु भूतग्रहभयेषु च ॥ अपामार्जनकं शस्त्रं विष्णुनामाभिमंत्रि
तं ॥ ८५ ॥ एताकृष्णविष्णुशरीरसंभवाजनार्द्दनोहं स्वयमेव चागतः ॥ हतं मया
दुष्टमशेषमस्य स्वस्थो भवत्वेषु यथा वचो हरे ॥ ८६ ॥ शांतिरस्तु शिवं चास्तु दुष्ट
मस्य प्रशाम्यतु ॥ यदत्रुरितं किंचिन्नक्षिप्तं लवणार्णवे ॥ ८७ ॥ स्वास्थ्यमस्य शिवं
चास्तु हृषीकेशस्य कीर्त्तिनात् ॥ यएवागतं पापं तत्रैव प्रतिगच्छतु ॥ ८८ ॥ एतद्रो
गादिपीडासु कर्त्तव्यं हितमिछता ॥ विष्णुभक्तेन कर्त्तव्यं अपामार्जनकं परं ॥ ८९ ॥
अनेन सर्वदुःखानि प्रशामं यांत्यसंशयं ॥ सर्वभूतहितार्थाय कुर्यात्तस्मात्स
दैव हि ॥ ९० ॥ ॥ इति श्रीदाल्भ्यपुलस्त्यसंवादे अपामार्जनं स्तोत्रं संपूर्णं ॥ ॥
ॐ नमो विष्णवे केशवाय सर्वक्लेशापहर्त्रे नमो नमः ॥